# ओ३म्

# अथ काव्यालङ्कार-सूत्राणि

लेखकः-

भगवत्पाद महर्षि यास्क

सम्पादकः-

केशरीनन्दन

Arshlibrary

प्रकाशकः-

मीमांसक आर्ष अनुसन्धान केन्द्र

# महर्षि यास्क प्रणीत काव्यालङ्कार-सूत्राणि

## प्रथमोध्याय

अथ काव्यालङ्कारः ॥१॥ लौकिकवैदिकास्ते ॥२॥ शब्दार्थोभयविधत्वात् ॥३॥ गुणलङ्कारसरङ्गतावदुष्टौ रसवच्छब्दार्थौ काव्यम् ॥४॥ तद्ग्राह्यमलङ्कारात् ॥५॥ सौन्दर्यमलङ्कारः ॥६॥ स, दोषगुणलङ्कारहानादानाभ्याम् ॥७॥ शास्त्रतस्ते ॥८॥ काव्यं सद् दृष्टादृष्टार्थं प्रीतिकीर्तिहेतुत्वात् ॥९॥

## द्वीतीयऽध्यायः

अरोचकिनः सतृणाभ्यवहारिणश्च कवयः ॥१॥ पूर्वे शिष्याः, विवेकित्वात् ॥२॥ नेतरे, तद्विपर्यात् ॥३॥ न शास्त्रमद्रव्येष्वर्थवत् ॥४॥ न कतकं पङ्कप्रसादनाय ॥५॥ रीतिरात्मा काव्यस्य ॥६॥ विशिष्टा पदरचना रितिः ॥७॥ विशेषो गुणात्मा ॥८॥ सा त्रिधा-वैदर्भी गौडीया पाञ्चाली चेति ॥९॥ विदर्भादिषु दृष्टत्वात्तत्समाख्या ॥१०॥ समग्रगुणा वैदर्भी ॥११॥ ओजः कान्तीमती गौडीया ॥१२॥ माधुर्यसौकुमार्योपपन्ना पाञ्चाली ॥१३॥ तासां पूर्वा ग्राह्या गुणसाकल्यात् ॥१४॥ न पुनरितरे, स्तोकगुणत्वात् ॥१५॥ तदारोहणार्थमितराभ्यास इत्येके ॥१६॥ तत्तु न, अतत्त्वशीलस्य तत्त्वाऽनिष्पतेः ॥१७॥ न शणसूत्रवानाभ्यासे त्रसरसूत्रवाने वैचित्र्यलाभः

Arshlibrary

॥१८॥ सापि समासाभावे शुद्धवैदर्भी ॥१९॥ तस्यामर्थगुणसम्पदास्वाद्या ॥२०॥ तदुपारोहादर्थगुणलेशोऽपि ॥२१॥ सापि वैदर्भी तात्स्थ्यात् ॥२२॥

## तृतियोऽध्यायः

लोको विद्या प्रकीर्णं च काव्याङ्गानि ॥१॥ लोकवृत्तं लोकः ॥२॥ शब्दस्मृत्यभिधानकोषछन्दोविचितिकलाकामशास्त्रदण्ड नीतिपूर्वा विद्या ॥३॥ शब्दस्मृतेः शब्दशुद्धिः ॥४॥ अभिधानकोषतः पदार्थनिश्चयः ॥५॥ छन्दोविचितेर्वृत्तसंशयच्छेदः ॥६॥ कलाशास्त्रेभ्यः कलात्त्वस्य संवित् ॥७॥ कामशास्त्रतः कामोपचारस्य ॥८॥ दण्डनीतेर्नयापनययोः ॥९॥ इतिवृत्तकुटिलत्वं च ततः ॥१०॥ लक्ष्यज्ञत्वमभियोगो वृद्धसेवाऽवेक्षणं प्रतिभानमवधानञ्च प्रकोर्णम् ॥११॥ तत्र काव्यपरिचयो लक्ष्यज्ञत्वम् ॥१२॥ काव्यबन्धोद्यमोऽभियोगः ॥१३॥ काव्योपदेशगुरूशुश्रूषणं वृद्धसेवा ॥१४॥ पदाधानोद्धरणमवेक्षणम् ॥१५॥ कवित्वबीजं प्रतिभानम् ॥१६॥ चितैकाग्रयमवधानम् ॥१७॥ तद् देशकालाभ्याम् ॥१८॥ विविक्तो देशः ॥१९॥ रात्रियामस्तुरीयः कालः ॥२०॥ काव्यं गद्यं पद्यं च ॥२१॥ गद्यं वृत्तगन्धि चूर्णमुत्कलिकाप्रायं च ॥२२॥ पद्यभागवद् वृत्तगन्धि ॥२३॥ अनाविद्धललितपदं चूर्णम् ॥२४॥ विपरीतमुत्कलिकाप्रायम् ॥२५॥ पद्यमनेकभेदम् ॥२६॥ तदनिबद्धं निबद्धं च ॥२७॥ क्रमसिद्धिस्तयोः स्त्रगुत्तंसवत् ॥२८॥ नानाविद्धं चकास्त्येकतेजःपरमाणुवत् ॥२९॥ परम्,

Arshlibrary

संदर्भेषु दशरूपकं श्रेयः ॥३०॥ तद्धि चित्रं चित्रपटवद् विशेषसाकल्यात् ॥३१॥ ततोऽन्यभेदक्लृप्तिः ॥३२॥

## चतुर्थोऽध्यायः

गुणविपर्यात्मानो दोषाः ॥१॥ अर्थतस्तदवगमः ॥२॥ सौकार्याय प्रपञ्चः ॥३॥ दुष्टं पदमसाधु कष्टं ग्राम्यमप्रतीतमनर्थकञ्च ॥४॥ शब्दस्मृतिविरुद्धमसाधु ॥५॥ श्रुतिविरसं कष्टम् ॥६॥ लोकमात्रप्रयुक्तं ग्राम्यम् ॥७॥ शास्त्रमात्रप्रयुक्तमप्रतीतम् ॥८॥ पूरणार्थमनर्थकम् ॥९॥ अन्यार्थनेयगूढार्थाश्लीलक्लिष्टानि च ॥१०॥ रूढिच्युतमन्यार्थम् ॥११॥ कल्पितार्थं नेयार्थम् ॥१२॥ अप्रसिद्धार्थप्रयुक्तं गूढ़ार्थम् ॥१३॥ असभ्यार्थन्तरमसभ्यस्मृतिहेतुश्चाऽश्लीलम् ॥१४॥ न गुप्तलक्षितसंवृत्तानि ॥१५॥ अप्रसिद्धाऽसभ्यं गुप्तम् ॥१६॥ लाक्षणिकासभ्यान्वितं लक्षितम् ॥१७॥ लोकसंवीतं संवृत्तम् ॥१८॥ व्रीडाजुगुप्साऽमङ्गलातङ्कायिभेदात् ॥१९॥ व्यवहितार्थप्रत्ययं क्लिष्टम् ॥२०॥ अरूढार्थत्वात् ॥२१॥ अन्त्याभ्यां वाक्यं व्याख्यातम् ॥२२॥

## पञ्चमोऽध्यायः

भिन्नवृत्तयतिभ्रष्टविसन्धीनि वाक्यानि ॥१॥ स्वलक्षणच्युतवृत्तं भिन्नवृत्तम् ॥२॥ विरसविरामं यतिभ्रष्टम् ॥३॥ तधातुनामभागभेदे स्वरसन्ध्यकरणे प्रायेण ॥४॥ न वृत्तदोषात्पृथग् यतिदोषो वृत्तस्य यत्यात्मकत्वात् ॥५॥ न

Arshlibrary

लक्ष्मणः पृथत्त्वात् ॥६॥ विरूपपदसन्धिर्विसन्धिः ॥७॥ पदसन्धिवैरूप्यं विश्लेषोऽश्लीलत्वं कष्टत्वं च ॥८॥ व्यथैकार्थ संदिग्धाऽप्रयुक्ताऽपक्रम लोकविद्याविरुद्धानि च ॥९॥ व्याहतपूर्वोत्तरार्थं व्यर्थम् ॥१०॥ उक्तार्थपदमेकार्थम् ॥११॥ न विशेषश्चेत् ॥१२॥ धनुर्ध्वनौ धनुःश्रुतिरारूढेः प्रतिपच्यै ॥१३॥ कर्णावतंसश्रवणकुण्डलशिरः शेखरेषु कर्णादिनिर्देशः सन्निधेः ॥१४॥ मुक्ताहारशब्दे मुक्ताशब्दः शुद्धेः ॥१५॥ पुष्पमालाशब्दे पुष्पपदमुत्कर्षस्य ॥१६॥ करिकल भशब्दे करिशब्दस्ताद्रूप्यस्य प्रतिपत्त्यर्थम् ॥१७॥ विशेषणस्य च ॥१८॥ तदिदं प्रयुक्तेषु ॥१९॥ संशयकृत् सन्दिग्धम् ॥२०॥ मायादिकल्पितार्थमप्रयुक्तम् ॥२१॥ क्रमहीनार्थमपक्रमम् ॥२२॥ देशकालस्वभाव विरुद्धार्थानि लोकविरुद्धानि ॥२३॥ कला चतुर्वर्गशास्त्रविरुद्धार्थानि विद्याविरुद्धानि ॥२४॥

Arshlibrary

## षष्ठोऽध्यायः

काव्यशोभायाः कर्त्तारो धर्मा गुणाः ॥१॥ तदतिशय हेतवस्त्वलङ्काराः ॥२॥ पूर्वे नित्याः ॥३॥ ओजःप्रसादश्लेषसमतासमाधिमाधुर्य सौकुमार्यो-दारतार्थव्यक्तिकान्तयो बन्धगुणाः ॥४॥ गाढबन्धत्वमोजः ॥५॥ शैथिल्यं प्रसादः ॥६॥ गुणः संप्लवात् ॥७॥ न शुद्धः ॥८॥ स त्वनुभवसिद्धः ॥९॥ साम्योत्कर्षो च ॥१०॥ मसृणत्वं श्लेषः ॥११॥ मार्गाभेदः समता ॥१२॥ आरोहावरोह क्रमः समाधिः ॥१३॥ न पृथगारोहावरोहयोरोजःप्रसादरूपत्वात् ॥१४॥ न सम्पृक्तत्वात् ॥१५॥

अनैकान्त्याच्च ॥१६॥ ताविति भेदभ्युपगमः ॥१७॥ विशेष/पेक्षत्वात्तयोः ॥१८॥ आरोह व रोहनिमित्तं समाधिराख्यायते ॥१९॥ क्रमविधानार्थत्वाद्वा ॥२०॥ पृथक्पदत्वं माधुर्यम् ॥२१॥ अजरत्वं सौकुमार्यम् ॥२२॥ विकटत्वमुदारता ॥२३॥ अर्थव्यक्तिहेतुत्वमर्थ व्यक्तिः ॥२४॥ औज्वल्यं कान्तिः ॥२५॥ नासन्तः सवेद्यत्वात् ॥२६॥ न भ्रान्ता निष्कम्पत्वात् ॥२७॥ न पाठधर्माः सर्वत्रष्टेः ॥२८॥

## सप्तमोऽध्यायः

त एवार्थगुणाः ॥१॥ अर्थस्य प्रौढिजः ॥२॥ अर्थवैमल्यं प्रसादः ॥३॥ घटना श्लेषः ॥४॥ अवैषम्यं समता ॥५॥ सुगमत्वं वाऽवैषम्यमिति ॥६॥ अर्थदृष्टिः समाधिः ॥७॥ अर्थो द्विविधोऽयोनिरन्यच्छायायोनिश्च ॥८॥ श्राद्यो व्यक्तः सूक्ष्मश्च ॥९॥ सूक्ष्मो भाव्यो वासनीयश्च ॥१०॥ उक्तिवैचित्र्यं माधुर्यम् ॥११॥ अपारुष्यं सौकुमार्यम् ॥ १२॥ अग्राम्यत्वमुदारता ॥१३॥ वस्तुस्वभाव स्फुटत्वमर्थव्यक्तिः ॥१४॥ दीप्तरसत्वं कान्तिः ॥१५॥

## अथाष्टमोऽध्यायः

पदमनेकार्थमचरं वाऽऽवृत्तं स्थान नियमे यमकम् ॥१॥ पादः पादस्यैकस्यानेकस्य चादिमध्यान्त भागाः स्थानानि ॥२॥ भङ्गादुत्कर्षः ॥३॥ शृङ्खला परिवर्तकश्चूर्णमिति भङ्गमार्गः ॥४॥ वर्णविच्छेदचलनं शृङ्खला ॥५॥ सङ्गविनिवृत्ती स्वरूपापत्तिः परिवर्तकः ॥६॥ पिण्डाक्षरलोपे स्वरूपलो

Arshlibrary

पश्चूर्णम् ॥७॥ शेषस्सरूपोऽनुप्रासः ॥८॥ अतुल्य वर्णानुप्रासः श्रेयान् ॥९॥ पादानुप्रासः पादयमकवत् ॥१०॥

## नवमोऽध्यायः

उपमानोपमेययोर्गुणलेशतः साम्यमुपमा ॥१॥ गुणबाहुल्यतश्च कल्पिता ॥२॥ तद् द्वैविध्यं पदवाक्यार्थवृत्तिभेदात् ॥३॥ सा पूर्णा लुप्ता च ॥४॥ गुणद्योतकोपमानोपमेयशब्दानां सामग्रये पूर्णा ॥५॥ लोपे लुप्ता ॥६॥ स्तुतिनिन्दात्त्वाख्यानेषु ॥७॥ सम्भवास्तद्दोषाः ॥८॥ जाति प्रमाणधर्म न्यूनतोपमानस्य हीनत्वम् ॥९॥ ऐकान्त्यात्तेनाधिकत्वं व्याख्यातम् ॥१०॥ धर्मयोरेकनिर्देशेऽन्यस्य संवित् साहचर्यात् ॥११॥ उपमानोपमेययोर्लिङ्गव्यत्यासो लिङ्गभेदः ॥१२॥ इष्टः पुंनपुंसकयोः प्रायेण ॥१३॥ लौकिक्यां समासाभिहितायामुपमाप्रपञ्चे च ॥१४॥ तेन वचनभेदो व्याख्यातः ॥१५॥ अप्रतीतगुण सादृश्यमसादृश्यम् ॥१६॥ असादृश्यहता छुपमा तन्निष्ठाश्च कवयः ॥१७॥ उपमानाधिक्यात्तदपोह इत्येके ॥१८॥ न, अपुष्टार्थत्वात् ॥१९॥ अनुपपत्तिरसम्भवः ॥२०॥ न विरुद्धोऽतिशयः ॥२१॥

## दशमोऽध्यायः

प्रतिवस्तुप्रभृतिरुपमाप्रपञ्चः ॥१॥ उपमेयस्योक्तौ समानवस्तुन्यासः प्रतिवस्तु ॥२॥ अनुक्तौ समासोक्तिः ॥३॥ किञ्चिदुक्तावप्रस्तुतप्रशंसा ॥४॥ समेन

Arshlibrary

वस्तुनाऽन्यापलापोऽपह्नुतिः ॥५॥ उपमानोपमेयस्य गुणसाम्यात्तत्त्वारोपो रूपकम् ॥६॥ सधर्मेषु तन्त्रप्रयोगे श्लेषः ॥७॥ सादृश्याल्लक्षणा वक्रोक्तिः ॥८॥ अतद्रूपस्यान्यथाऽध्यवसानमतिशयार्थमुत्प्रेक्षा ॥९॥ लोके सम्भाव्यधर्मस्य तदुत्कर्षकल्पनाऽतिशयोक्तिः ॥१०॥ उपमानोपमेयसंशयः सन्देहः ॥११॥ विरुद्धाभासत्वं विरोधः ॥१२॥ क्रियाप्रतिषेधे प्रसिद्धतत्फलव्य क्तिर्वि भावना ॥१३॥ एकस्योपमेयत्वोपमानत्वेऽनन्वयः ॥१४॥ क्रमेणोपमेयोपमा ॥१५॥ समविसदृशाभ्यां परिर्वतनं परिवृत्तिः ॥१६॥ उपमेयोपमानां क्रमसम्बन्धः क्रमः ॥१७॥ अनुषगत उपमानोपमेयवाक्येष्वेका क्रिया दीपकम् ॥१८॥ तत् त्रिविधमादिमध्यान्तवाक्यवृत्तिभेदात् ॥१९॥ क्रिययैव स्वगतार्थान्वयख्यापनं निदर्शनम् ॥२०॥ उक्त सिद्धयै वस्तुनोऽर्थान्तरस्यैव न्यसनमर्थान्तरन्यासः ॥२१॥ उपमेयस्य गुणातिरेकत्वं व्यतिरेकः ॥२२॥ एकगुण हानिकल्पनायां साम्यदा विशेषोक्तिः ॥२३॥ सम्भाव्यविशिष्टकर्माकरणान्निन्दास्तोत्रा व्याजस्तुतिः ॥२४॥ व्याजस्य सत्यसारूप्यं व्याजोक्तिः ॥२५॥ विशिष्टेन साम्यार्थमेककालक्रियायोग- स्तुल्ययोगिता ॥२६॥ उपमानाक्षेपश्चाक्षेपः ॥२७॥ वस्तुद्रयक्रिययोस्तुल्यकालयोरेकपदाभिधानं सहोक्तिः ॥२८॥ यत्सादृश्यं तत्सम्पत्तिः समाहितम् ॥२९॥ स्वगुणविसर्गेऽन्यगुणादानं तद्गुणः ॥३०॥ यथोत्तरमुत्कर्षः सारम् ॥३१॥ कर्त्तव्ये कार्ये दैवसहायः समाधिः ॥३२॥ हेतोः तोर्वाक्यपदार्थत्वे काव्यलिङ्गम् ॥३३॥ आश्रारोप्यमाणमुत्सृज्य

Arshlibrary

प्रकृतस्थापनं निश्चयः ॥३४॥ अलङ्कारस्यालङ्कारयोगित्वं संसृष्टिः ॥३५॥ तद्भेदावुपमारूपकोत्प्रेक्षावयवी ॥३६॥ उत्प्रेक्षाहेतुरुत्प्रेक्षावयवः ॥३७॥

## एकादशोऽध्यायः

नैकं पदं द्विः प्रयोज्यं प्रायेण ॥१॥ नित्यं संहितैकपदवत्यादेष्वर्द्धान्तिवर्जम् ॥२॥ न पादान्तलघोर्गुरुत्वं च सर्वत्र ॥३॥ न गधे समाप्तप्रायं वृत्तमन्यत्रोद्गतादिभ्यः संवादात् ॥४॥ न पादादौ खल्वादयः ॥५॥ ना किञ्चिदसमाप्तप्रायं वाक्यम् ॥६॥ न कर्मधारय बहुव्रीहिप्रतिपत्तिकरः ॥७॥ तेन विपर्ययो व्याख्यातः ॥८॥ सम्भाव्यनिषेधनिवर्तने द्वौ प्रतिषेधो ॥९॥ विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ ॥१०॥ सर्वनाम्नाऽनुसन्धिर्वृत्तिच्छन्नस्य ॥११॥ सम्बन्धसम्बन्धेऽपि षष्ठी क्वचित् ॥१२॥ अतिप्रयुक्तं देशभाषापदम् ॥१३॥ लिङ्गाध्याहारी ॥१४॥ लच पाशब्दाश्च ॥१५॥ न त बाहुल्यमेकत्र ॥१६॥ स्तनादीनां द्वित्वाविष्टा जातिः प्रायेण ॥१७॥

Arshlibrary

## द्वादशोऽध्यायः

रुद्रावित्येकशेषोऽन्वेष्यः ॥१॥ मिलिक्लबिचपिभृतीनां धातुत्वं धातुगणस्यासमाप्तेः ॥२॥ वलेरात्मनेपद्मनित्यं ज्ञापकात् ॥३॥ चचिङोऽनुबन्धकरणम् ॥४॥ क्षीयत इति कर्मकर्तरि ॥५॥ स्विद्यत इति च ॥६॥ मार्गेरात्मनेपदमलक्ष्म ॥७॥ लोलमानादयश्चानशि ॥८॥ लभेर्गत्यर्थत्वारिणच्यणौ कर्तुः कर्मत्वाकर्मत्वे ॥९॥ ते मे शब्दौ निपातेषु

॥१०॥ तिरस्कृत इति परिभूतेऽन्तर्युपचारात् ॥११॥ नैकशब्दः सुप्सुपेति समासात् ॥१२॥ मधुपिपासुप्रभृतीनां समासो गभिगाम्यादिषु पाठात् ॥१३॥ त्रिवलीशब्दः सिद्धः संज्ञा चेत् ॥१४॥ बिम्बाधर इति वृत्तौ मध्यमपदलोपन्याम् ॥१५॥ आमूललालादिषु वृत्तिर्विस्पष्टपटुवत् ॥१६॥ न धान्यषष्ठादिषु षष्ठीसमासप्रतिषेधः पूरणेनान्यतद्धितान्तत्वात् ॥१७॥ पत्रपीतिमादिषु गुणवचनेन ॥१८॥ अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माधुत्तरपदः ॥१९॥ हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदात् ॥२०॥ पूर्वनिपातेऽपभ्रंशो रयः ॥२१॥ निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः परिगणनस्य प्रायिकत्वात् ॥२२॥ शक्यमिति रूपं विलिङ्गवचनस्यापि कर्माभिधायां सामान्योपक्रमात् ॥२३॥ हानिवदाधिक्यमप्यङ्गानां विकारः ॥२४॥ न कृमिकीटानामेकवद्भावः प्रसङ्गात् ॥२५॥ न खरोष्ट्राष्ट्रखरमिति पाठात् ॥२६॥ आसेत्यसतेः ॥७॥ युध्येदिति युधः क्वचि ॥२८॥ विरलायमानादिषु क्यनिरूप्यः ॥२९॥ अहेतौ हन्तेर्णिच् चुरादिपाठात् ॥३०॥ अनुचरीति चरेष्टित्त्वात् ॥३१॥ केसरालमित्यलते रणि ॥३२॥ पत्रलमिति लातेः के ॥३३॥ महादयो मूलविभुजादिदर्शनात् ॥३४॥ ब्रह्मादिषु हन्तेर्नियमादरिहायसिद्धिः ॥३५॥ ब्रह्मविदादयः कृदन्तवृत्त्या ॥३६॥ तैर्महीधरादयो व्याख्याताः ॥३७॥ भिदुरादयः कर्मकर्तरि कर्तरि च ॥३८॥ गुणविस्तरादयश्चिन्त्याः ॥३९॥ अवतरावचा प्रशब्दयोर्दीर्घहस्वत्वव्यत्यासो वालानाम् ॥४०॥ शोभेति निपातनात् ॥४१॥ अविधौ गुरोः स्त्रियां बहुलं

Arshlibrary

विवक्षा ॥४२॥ व्यवसितादिषु क्तः कर्तरि चकारात् ॥४३॥ श्रहेति भूतेऽन्यलडन्तभ्रमाद् ब्रुवो लटि ॥४४॥ शबलादिभ्यः स्त्रियां टापोऽप्राप्तिः ॥४५॥ प्राणिनि नीलीति नित्यम् ॥४६॥ मनुष्यजातेर्विवक्षाऽविव ॥४७॥ उकारान्तादयू प्रवृत्तेः ॥४८॥ कार्तिकीय इति ठञ् दुर्धरः ॥४९॥ शार्वरमिति च ॥५०॥ शाश्वतमिति प्रयुक्तेः ॥५१॥ राजवंश्यादयः साध्वर्थे ये भवन्ति ॥५२॥ दारवशब्दो दुष्प्रयुक्तः ॥५३॥ मुग्विमादिष्विमनिज्मृग्यः ॥५४॥ श्रीपादयश्चातुर्वर्ण्यवत् ॥५५॥ ष्यञः पित्करणादीकारो बहुलम् ॥५६॥ सामग्र्यमित्यादिषु विकल्पेन ॥५७॥ धन्वीति ब्रह्मादिषु पाठात् ॥५८॥ चतुरस्रशोभीति पिनौ ॥५९॥ कञ्चुकीया इति क्यचि ॥६०॥ बौद्धप्रतियोग्यपेचायामप्यातिशायनिकाः ॥६१॥ कौशिलादय इलचि वर्णलोपात् ॥६२॥ मौक्तिकमिति विनयादिपाठात् ॥६३॥ प्रतिभादयः प्रज्ञादिषु ॥६४॥ न सरजसमित्यनव्ययीभावे ॥६५॥ न धृतधनुषीति श्रसंज्ञायाम् ॥६६॥ दुर्गन्धिपद हद्दुर्लभः ॥६७॥ सुदत्यादयः प्रतिविधेयाः ॥६८॥ क्षतहढोरस इति न कप् तदन्तविधि- प्रतिषेधात् ॥६९॥ अवैहीति वृद्धिरवद्या ॥७०॥ अपाङ्गनेत्रेति लुगलम्यः ॥७१॥ नेष्टाः श्लिष्टप्रियादयः पुंवद्भावप्रतिषेधात् ॥७२॥ दृढभक्तिरसौ सर्वत्र ॥७३॥ जलजम्बुलतादयो ह्रस्वविधेः ॥७४॥ तिलकादयोऽजिरादिषु ॥७५॥ निशम्यनिशमय्यशब्दौ प्रकृतिभेदात् ॥७६॥ संयम्यनियम्यशब्दावणिजन्तत्वात् ॥७७॥ प्रपीयेति पीडः ॥७८॥ दूरयतीति बहुलग्रहणात् ॥७९॥ गच्छतीप्रभृतिष्वनिषेध्यो

Arshlibrary

नुम् ॥८० ॥ मित्रेण गोत्रेति पुंवद्भावात् ॥८१ ॥ वेत्स्यसीति पदभङ्गात् ॥८२ ॥ कामयानशब्दः सिद्धोऽनादिश्चेत् ॥८३ ॥ सौहृददौर्हृदशब्दावणि हृद्भावात् ॥८४ ॥ विरमेति निपातनात् ॥८५ ॥ उपर्यादिषु सामीप्ये द्विरुक्तेषु द्वितीया ॥८६ ॥ मन्दमन्दमित्यप्रकारार्थत्वे ॥८७ ॥ न निद्राद्रुगिति भष्भावप्राप्तेः ॥८८ ॥ निष्यन्द इति षत्वं चिन्त्यम् ॥८९ ॥ नाङ्गुलिसङ्ग इति मूर्धन्यविधेः ॥९० ॥ तेनावन्तिसेनादयः प्रत्युक्ताः ॥९१ ॥ नेन्द्रवाहने पत्वमाहितत्वस्याविवक्षितत्वात् ॥९२ ॥

Arshlibrary